# Shri Sharada Stavanam

# श्रीशारदास्तवनम् २

## Document Information

Text title : Sharada Stavanam 2

File name : shAradAstavanam2.itx

Category : devii, sarasvatI, ApaTIkara

Location : doc_devii

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# श्रीशारदास्तवनम् २

(रागः केदार)

देवि शारदे निर्मल-मतिदे शरणं तव पदकमलम् ।
प्रसन्नवदने सुधांशुवसने नाशय मम मति-तिमिरम् ॥ १॥

विश्ववन्दिते गानरञ्जिते तन मे मनसि निवासम् ।
सत्वरमुद्धर मां भवसागरपतितं हा विलपन्तम् ॥ २॥

बहुसुखदायिनि दुरितविनाशिनि संहर तापत्रितयम् ।
सुवर्णरचिते नवरसमुदिते करुणां कुरु विनतोऽहम् ॥ ३॥

वीणाधारिणि मयूरवाहिनि हृदये वस मे सततम् ।
ज्ञानकरीमज्ञानसंहरी वन्देऽहं त्वामनिशम् ॥ ४॥

वादयसि त्वं वीणां सततं नयसि लयं च विषादम् ।
ज्ञानविहीनं व्यर्थं सकलं कथयसि तत्त्वं विमलम् ॥ ५॥

स्वयम्भु-तनये दयाद्रहृदये व्यपनय मानस-तापम् ।
प्रतिभाशालिनि सरोजवासिनि कुरु मे प्रतिभावन्तम् ॥ ६॥

प्रणत-भक्तजन-दुःख-विनाशनमेतत् त्वदीयकार्यम् ।
अध्ययने ये निरताः सदये वितरसि तेषु ज्ञानम् ॥ ७॥

तनयमधीरं जननि सत्वरं पायय दिव्य-स्तन्यम् ।
घनान्धतिमिरे सुघोरविपिने धीरय मार्गभ्रष्टम् ॥ ८॥

तव पदकमले विलसतु विमले मदीय-जीवनपद्मम् ।
नान्यकामनां नान्ययाचनां काङ्क्षति भगवति चित्तम् ॥ ९॥

इति श्री आपटीकरविरचितं श्रीशारदास्तवनं सम्पूर्णम् ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Shri Sharada Stavanam*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*